# शब्दानुशासनस्य मुख्यप्रयोजनं महाभाष्यदिशा आलोच्यताम् ।।

प्रयोजनम् अनुद्दिश्य न मन्दः अपि प्रवर्तते इत्यभियुक्त्या प्रमीयते प्रयोजनं हि प्रवृत्तिप्रदीपकम् । तस्मात् सर्वेषु शास्त्रेषु तत्तच्छास्त्रप्रयोजनं प्रतिपादितं दृश्यते । तस्मात् महाभाष्ये भगवता पतञ्जलिना तस्य प्रयोजनम् उल्लिखितम् । कानि पुनः महाभाष्यस्य प्रयोजनानि इति चेत् उच्यते – रक्षोहागमलघुसन्देहाः प्रयोजनम् इति । इदानीम् एतानि प्रयोजानानि समासेन आलोच्यन्ते ।

रक्षा- वेदरक्षार्थं हि आवश्यकं व्याकरणस्य अध्ययनम् । यतो हि लोपागमवर्णविकारैः वेदे प्रयुक्तानि त्मना देवासः गृभ्नामि प्रभृतीनि पदानि प्रमादकल्पितानि इति विविच्य अवैयाकरणैः तेषां परिवर्तने वेदस्य वेदता अपगच्छति । अतो वेदरक्षायै पठनीयं व्याकरणम् । उक्तञ्च भाष्यकृता – रक्षार्थं हि वेदानाम् अध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति इति । परन्तु गुरुशिष्यसम्बन्धो हि महान् वेदरक्षाहेतुः इति कुमारिलभट्टेन उक्तम् । परन्तु गुरोः अभावे शिष्यस्य यदि शंका जायते तदा व्याकरणमेव शरणं तस्याज्ञानस्य निराकरणे । तस्मादेव व्याकरणम् अध्येयम् ।

ऊहः—व्याकरणाध्ययनस्य प्रयोजनान्तरं हि ऊहः । ऊहो नाम आदेशप्रयोजनाभ्यां मन्त्रस्थपदगतलिङ्गविभक्तिवचनपरिवर्तनम् । उक्तञ्च ऋग्वेदे – प्रकृतौ आम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठः ऊहः । इति । तथाहि व्याकरणज्ञानाद् ऋते प्रकृतिवद् विकृतिः कर्तव्या इति वाक्यं मनसि निधाय आग्नेयवत् सौर्यः अनुष्ठेयः इति विधिवाक्यं स्मरन्नपि सूर्यकर्मणि अग्नये त्वा जुष्टं निर्वपामि इति मन्त्रस्थले सूर्याय त्वा जुष्टं निर्वपामि इति मन्त्रं पठितुं न शक्नुयात् । अतः ऊहार्थं व्याकरणम् अध्येयम् । उक्तञ्च भाष्यकृता – ऊहःखल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणयितव्याः । तां नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्माद् अध्येयं व्याकरणम् ।

आगमः- व्याकरणस्य तृतीयं प्रयोजनं हि आगमः । श्रुतिः शास्ति –ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो अध्येयो ज्ञेयश्च इति । श्रुतेः आदेशस्य अपालने प्रत्यवायोत्पत्तिः । एवं श्रुत्यादेशम् अनुसृत्य प्रत्यवायपरिहाराय वेदपुरुषस्य अङ्गभूतत्वात् वेदार्थज्ञानस्य व्याकरणाधीनत्वात् च अध्येयं व्याकरणम् । तदुक्तं महाभाष्ये –
आगमः खल्वपि । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो अध्येयो ज्ञेयश्च । प्रधानं च षट्सु अङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । इति ।

लघुता—लघुतासाधनार्थं हि व्याखरणम् अध्येयम् । प्रतिपदपाठेन शब्दज्ञानम् असम्भवं शब्दानाम् आनन्त्यात् । आम्नातं च श्रुतौ—बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम ।। इति । तस्मात् एव व्याकरणम् अध्येयम् । तदुक्तं भाष्ये –न चान्तरेण व्याकरणं लघुना उपायेन शब्दाः शक्याः ज्ञातुम् ।। इति ।

असन्देहः—संशीतिशातनाय अध्येयं व्याकरणम्। ननु कथंकारं तत् संशीतिशातनम् इति चेत्- अत्रोच्यते – याज्ञिकाः पठन्ति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत ॥ इति। अत्र स्थूला चासौ पृषती चेति स्थूलपृषती इति कर्मधारय उत स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती इति बहुव्रीहिसमासः जात इति सन्देहः। अत्र तु स्वरज्ञानेनैव संशीतिशातनं भवति। स्वरज्ञश्च अवैयाकरणो भवितुं नालम्। अतः स्वरसन्देहनिरसनाय अध्येयं व्याकरणम् इति। भणति च भाष्यकारः—

असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति – स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत इति। तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती इति। तां नावैयाकरणः स्वरतः अध्यवस्यति इति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथान्तोदात्तत्वं ततस्तत्पुरुषः इति। इति शम्।